# शोधप्रबन्धनाम- *महाभाष्य*दिशा *ज्ञापकसंग्रहस्य* समीक्षा

## सारांशः

सूत्रवार्त्तिकभाष्यात्मकपाणिनीयव्याकरणरत्नरूप*महाभाष्ये* “आचार्य-प्रवृत्तिर्ज्ञापयति” इत्येवंरूपपरिभाषात्मकतद्व्यतिरिक्तात्मकनैकवचनानि लभ्यन्ते। तेषु परिभाषातिरिक्तवचनसंकलनात्मकलघुग्रन्थो हि *ज्ञापकसंग्रहः* इति। ग्रन्थस्यास्य नागेशकर्तृत्वे सन्देहात् *परिभाषेन्दुशेखरप्रदीपोद्द्योता*द्यध्ययनेन तत्कृतत्वविमर्शः विहितः। नागेशदेशकालकृत्यादिवृत्तान्तविषयालोचना प्रस्तुता। नागेशस्य गुरुशिष्यपरम्परापरिचयः तालिकासहयोगेन प्रोक्तः। *महाभाष्य*रचनाकालविमर्शः कृतः भाष्योपलब्धप्रमाणानि भाष्याद्बहिःलब्धप्रमाणानि चाधारीकृत्य। पातञ्जलभाष्यस्य महाभाष्यत्वव्यवहारविषयविचारः विहितः। पतञ्जलिकृतीनां *महाभाष्य*टीकाकर्तॄणां च विषये परिचयः प्रदत्तः। वर्तमानास्वपि सूत्र-वृत्ति-वार्त्तिक-भाष्य-दर्शन-प्रक्रिया-सिद्धान्त-व्यवहार-अभिधान-अनुवाद-पारायण-आधुनिकाख्यपरम्परासु मे शोधप्रबन्धे *अष्टाध्यायी*-प्रक्रिया-दार्शनिकक्रमानाश्रित्य तत्समालोचनेन च नागेशस्य प्रक्रियाक्रमे तथा च दार्शनिकक्रमे चान्तर्भावत्वं प्रदर्शितम्। मया *ज्ञापकसंग्रहस्य* भिन्ननागेशकर्तृत्वसमर्थकेन भाषापार्थक्यं, शैलीभिन्नत्वं, परमतोपस्थापन-तत्खण्डनविरहः, पुनरुक्तिदोषः, अनुक्तासंग्रहाक्षेपः, सविशदविवरणाभावः चेति विषयान् पश्यतास्य नागेशाकर्तृत्वं प्रतिपादितम्। *ज्ञापकसंग्रहो*क्तज्ञापितवचनानां लुगादीनां सर्वादेशत्वं, द्वन्द्वसमासस्य विभाषा एकवद्भावत्वं, चरधातोः अधिकरणे उपपदे टप्रत्ययविधानं, लट् स्मे इत्यस्य परोक्षानद्यतनविषयत्वं, लकाराणां लस्य इत्त्वाभावः, सेवमानपचमानलभमानादिषु आनस्य टेरेत्वप्रसक्तिविषयत्वं, इवशब्देन योगे सप्तमीविभक्तिः, सिध्मादिभ्यश्चेति सूत्रे अनुवृत्तस्यान्यतरस्यांग्रहणस्य समुच्चयार्थकता, एकगोपूर्वाट्ठञ् नित्यमिति सूत्रे नित्यपदोपादानप्रयोजनं,

कारकसंज्ञायां तरतमयोगाभावः, उपदेशे आयन्नादेशकथनम्, अनुबन्धलक्षणस्वरे प्रत्ययलक्षणाभावः, स्वरविधौ सङ्घातः कार्यी भवति सप्तम्यस्तदन्तसप्तम्यश्च भवन्तीति एतेषां केषाञ्चित् सविशदं सविमर्शं *महाभाष्य*सम्मतत्वप्रदर्शनं विहितं पतञ्जलि-नागेश-कैयट-दीक्षित-वामन-जयादित्य-वासुदेवदीक्षित-ज्ञानेन्द्रसरस्वती-हरदत्त-जिनेद्रबुद्धिमतान्याश्रित्य। *महाभाष्यं* हि ज्ञापितवचनभाण्डारः भवति। *ज्ञापकसंग्रहाख्य*ग्रन्थोऽतीव संक्षिप्तोऽस्ति। भाष्यारूढानि बहूनि ज्ञाप्यानि *ज्ञापकसंग्रहे* असंगृहीतानि तानि रामानुजताताचार्यविदुषा संकलितानि व्याख्यातानि च सन्ति। तानि मे शोधप्रबन्धे आलोच्यानि न सन्ति। यानि *भाष्या*नारूढानि अपि तु *वैयाकरणसिद्धान्तकौमुदी*- *बालमनोरमा*टीका- *तत्त्वबोधिनी*टीका- *काशिकावृत्ति*- *न्यास*टीका- *पदमञ्जरी*टीकादिषु समुपलभ्यन्ते तान्यस्मिन्नध्याये आलोच्यानि सन्ति। अत्र पुनः शोधप्रबन्धभारभिया न सर्वाण्यपि आलोचितानि। आदौ वैयर्थ्यं, व्यर्थं सद् ज्ञापकं, स्वांशे चारितार्थ्यं, फलमन्यत्र इत्येवंरूपपादचतुष्टयमस्ति ज्ञापकसूत्रस्य। स्वांशे चारितार्थ्यं तु सुलभम्। परन्तु फलान्तरान्वेषणं दुष्करम्। अतः सर्वत्र ज्ञापितवचनस्य अन्यत्फलप्रदर्शनाय यथासम्भवं यत्नः विधीयते। अन्ते च *महाभाष्य*- *ज्ञापकसंग्रह*भिन्न-*वैयाकरणसिद्धान्तकौमुदी*- *बालमनोरमा*टीका *तत्त्वबोधिनी*टीका- *काशिकावृत्तिन्यास*-टीका *पदमञ्जरी*टीका *भाष्यप्रदीप*टीका *प्रदीपोद्द्योत*टीकाद्यध्ययनलब्धज्ञापितवचनानां पर्यालोचनं विहितम्। एवमेते विषयाः शोधप्रबन्धे यथामति यथाशक्ति यथासम्भवम् आलोचिताः। इत्येवं शोधप्रबन्धस्य समाप्तिर्जातेति शिवम्।